वर्षम्-०३ अङ्कः-०३ शोधज्योतिः
जनवरी-दिसम्बर, २०२१ ISSN-2350-0700

# प्रस्थानत्रयस्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः

**सागरः आचार्यः**[१]

नीत्युपसर्गपूर्वकेण्धातोर्घञि सिद्धोऽयं न्यायशब्दः। तथा च नीयन्ते अनेन इति न्यायशब्दार्थः। न्यायशब्दोऽयं संस्कृतवाङ्मयेषु विभिन्नरीत्या प्रयुक्तो दृष्टः। यद्यपि न्यायशब्देन गौतमस्य न्यायदर्शनं तर्कशास्त्रं वा स्मर्यते तथापि लौकिकव्यवहारेषु स्वानुभवेषु वा कमपि प्रसङ्गमधिकृत्य प्राप्तवाक्येष्वपि न्यायशब्दो युज्यते। एतादृशानां न्यायानां कृते 'लौकिकन्यायः' इति शब्दो जगति प्रसिद्धः। संस्कृतक्षेत्रे द्विविधो न्यायो दृश्यते। शास्त्रीयो लौकिकश्चेति। तत्र एतेऽल्पाक्षरीयाः लोकन्यायाः इति संस्कृते बहुधा प्रसिद्धाः, शास्त्रेषु उपयुक्ताश्च काश्चन उक्तयस्सन्ति, याभिः साहाय्येन शास्त्रे लोके वा कमपि विचारं, सिद्धान्तं वा सुलभतया अभीष्टार्थम् अवगन्तुं शक्यते।

शोधपत्रेऽस्मिन् परब्रह्मस्वामिनारायणप्रबोधितस्य अक्षरब्रह्मगुणातीतगुरुपरम्पराप्रवर्तितस्य अक्षरपुरुषोत्तमदर्शनस्य साम्प्रतेऽस्मिन् एकविंशतितमे ख्रिस्ताब्दे विरचितानि प्रस्थानत्रयस्वामिनारायणभाष्याण्यधिकृत्य लौकिकन्यायानां विषये लिख्यते। भगवत्स्वामिनारायणकृपया ब्रह्मस्वरूपप्रमुखस्वामिमहाराजाऽऽज्ञया तत्प्रेरणया एव महामहोपाध्यायैः अभिनवभाष्यकारैः पूज्यैः साधुभद्रेशदासैरक्षरपुरुषोत्तमसिद्धान्तप्रतिपादकानि प्रस्थानत्रयस्वामिनारायणभाष्याणि विरचितानि। अस्मिन् शोधपत्रे प्रत्येकं प्रस्थानं स्वीकृत्य तत्र कया रीत्या लौकिकन्यायप्रयोगो भाष्यकारैः कृतः तद्वक्ष्यते। ततश्च तैर्न्यायैः केषां सिद्धान्तानाम् अवबोधने सारल्यम् अनुभूतमिति प्रतिपादयिष्यामि। समग्रप्रस्थानत्रयस्वामिनारायणभाष्याणां सम्पूर्णाऽवलोकनानन्तरं ज्ञायते यत् सप्ततितोऽपि अधिकेषु स्थानेषु लौकिकन्यायाः भाष्येषु प्रयुक्ताः वर्तन्ते। तत्राऽपि चत्वारिंशत्तः अधिकाः विविधाः न्यायाः स्वामिनारायणभाष्येषु विराजिताः।

अथ प्रत्येकप्रस्थानस्थलौकिकन्यायविषये लिख्यते। आदौ तर्कप्रस्थानस्य बादरायणविरचितस्य ब्रह्मसूत्रस्य, ततश्च श्रुतिप्रस्थानानाम् उपनिषदाम् अन्ते च स्मृतिप्रस्थानस्य श्रीमद्भगवद्गीताया इति।

---

[१] शोधच्छात्रः, सारङ्गपुरम्, acharyasagar241@gmail.com

## १. ब्रह्मसूत्रस्वामिनारायणभाष्ये उपयुक्ताः लौकिकन्यायाः

भाष्येऽस्मिन् पञ्चविंशतितोऽधिकेषु स्थानेषु लौकिकन्याया उपयुक्ताः। यथा, प्रथमेऽध्याये शुगधिकरणे संवर्गविद्यानिरूपणावसरे 'काकाक्षिन्यायः'[२], द्वितीयेऽध्याये वियदधिकरणे 'सर्वशाखान्यायः'[३], तृतीयेऽध्याये 'स्थूणानिखननन्यायः'[४], चतुर्थेऽध्याये 'यथाक्रतुन्यायः'[५] इत्यादि प्रभृतयो न्यायाः प्रयोजिताः।

तत्र द्वितीयेऽध्याये प्रथमे पादे सुखदुःखवैषम्याऽऽक्रान्तजगदनुभूतेस्तत्कर्तुरेव वैषम्यनैर्घृण्यदोषत्वमित्याशङ्कानिवारणके वैषम्यनैर्घृण्याख्येऽधिकरणे परमात्मनि वैषम्यनैर्घृण्यदोषं नास्तीति सिद्धान्तो लौकिकन्यायेन सारल्येनावगच्छति। सूत्रमस्ति - 'न कर्माऽविभागादिति चेन्नाऽनादित्वादुपपद्यते चाप्युपलभ्यते च'[६] तत्र भाष्यकारो लिखति, 'उपपत्तिर्युक्तिः। उपलब्धिः साक्षाच्छ्रवणम्। युक्त्या श्रुत्या चापि सिद्ध्यतीत्यर्थः। उपपत्तिस्तावद् बीजाङ्कुरनयेनोन्नेया। अन्यथा कर्मपाशस्याऽनादित्वाऽभावे संसाराऽनादित्वाऽसिद्धिः। एवं च सति मुक्तस्याऽपि पुनः संसारापत्तिरकृताऽभ्यागमादिप्रसङ्गः संसारोद्भावनापेक्षितप्रथमप्रवृत्ति-प्रयोजनावधारणाद्यसम्भवश्चेति।'[७] यथा अङ्कुरं विना बीजं न स्याद् बीजं विना चाङ्कुरं न स्यात्तथैव कर्म विना संसाराभावः संसारं विना कर्माभावस्तथा सर्वदा वर्तते एव तथैव जीवेश्वरेषु कर्मपाशः प्रचलति एव। इत्थं दिव्यपुरुषाकृतिरक्षरब्रह्माधिपतिः अनन्तदिव्यैश्वर्यशक्तिसम्पन्नः परमदयालुः परमात्मा सहजानन्दः लीलामात्रेण स्वेच्छया तत्तज्जीवेश्वराऽनुष्ठितकर्मानुगुणतया विविधां सृष्टिं रचयतीति न नानाविधसृष्टिनिर्माणव्याजको वैषम्यनैर्घृण्यादिदोष इति।

## २. उपनिषत्स्वामिनारायणभाष्ये उपयुक्ताः लौकिकन्यायाः

---

[२] १/३/३५, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[३] २/३/२, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[४] ३/३/५०, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[५] ४/३/६, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[६] २/१/३६, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[७] २/१/३६, ब्रह्मसूत्रस्वामिनारायणभाष्यांशः

उपनिषत्भाष्येऽस्मिन् चत्वारिंशत्तोऽधिकेषु स्थानेषु लौकिकन्याया उपयुक्ताः। यथा, मुण्डकोनिषदि तृतीये मुण्डके अक्षरतत्त्वमुद्धाट्य पुनः परमात्मनिरूपणावसरे 'सिंहावलोकनन्यायः'[८], बृहदारण्यकोपनिषदि प्रथमे अध्याये पञ्चभूतनिरूपणसमये 'पञ्चीकरणन्यायः'[९], प्रश्नोपनिषदि पञ्चमे प्रश्ने तस्माद् विद्वान् एतेनैवायतनेनैकतरमन्वेतीति मन्त्रभागेन परब्रह्माभिध्यानवद् अक्षरब्रह्मध्यानमपि योग्यमेवेतिनिरूपणे 'तदावेशन्यायः'[१०] इत्यादिरीत्या न्यायाः प्रयोजिताः।

तत्र छान्दोग्योपनिषदि तृतीयेऽध्याये शाण्डिल्यविद्यायां श्रूयते 'सर्वं खल्विदं ब्रह्म...'[११] इति। अक्षरपुरुषोत्तमदर्शने अतिविशिष्टः सिद्धान्तोऽस्ति ब्रह्मरूपो भूत्वा परब्रह्मभक्तिः कर्तव्येति। सिद्धान्तोऽयम् अत्र एकेनैव ब्रह्मशब्देन गर्भितः। भाष्यकार एतन्मन्त्रनिरूपणे देहलीदीपकन्यायमुपयुज्याऽतिसरलतया सिद्धान्तं प्रकाशयति। ब्रह्मशब्दोऽत्र 'अथातो ब्रह्मजिज्ञासा'[१२] इतिसूत्रवद् अक्षरं ब्रह्म परं ब्रह्मेति उभयमभिधत्ते। ब्रह्मशब्दवाच्याऽक्षरब्रह्मपरब्रह्माऽऽत्मकत्वोपदेशो भवति साधूपायो ह्युपासकात्मनोऽक्षरब्रह्मरूपत्वं सम्पाद्य परब्रह्मोपासने। यथा गृहे देहलीस्थदीपको देहलीम् उभयतः स्वप्रकाशं यच्छति तथैव ब्रह्मशब्देन। भाष्ये लिखितमस्ति यद्- 'सर्वेषाम् अक्षरब्रह्मात्मकत्वाऽनुसन्धानेन सर्वान्तर्गतस्य स्वस्यापि तद्रूपतयाऽनुसन्धानात् स्वात्मब्रह्मैक्यसम्पत्तिः। सर्वेषां परब्रह्मात्मकत्वाऽनुसन्धानेन सर्वान्तर्गतस्य स्वस्यापि तच्छरीरतया स्वान्तर्यामित्वादिगुणकतया परमात्मोपासनलाभ इति। उपासकात्मतदुपास्यपरमात्मनोर्नित्यं स्वामिसेवकभावसम्बन्धस्य स्वीकाराद्, अक्षरब्रह्मणैव तदैकस्य च वेदान्तैरुपदेशादियं विवेकयोजना।'[१३] एतत् सर्वं भाष्यकारेण एकस्मिन्नेव देहलीदीपकेति लौकिकन्याये समाहितम्।

### ३. श्रीमद्भगवद्गीतास्वामिनारायणभाष्ये उपयुक्ताः लौकिकन्यायाः

---

[८] ३/१/८, मुण्डकोपनिषत्स्वामिनारायणभाष्यम्

[९] १/२/२, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[१०] ५/२, प्रश्नोपनिषत्स्वामिनारायणभाष्यम्

[११] ३/१४/१, छान्दोग्योपनिषत्स्वामिनारायणभाष्यम्

[१२] १/१/१, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[१३] ३/१४/१, छान्दोग्योपनिषत्स्वामिनारायणभाष्यांशः

भाष्येऽस्मिन् एकादशतोऽधिकेषु स्थानेषु लौकिकन्यायाः उपयुक्ताः। यथा तृतीयेऽध्याये इन्द्रियमनोनिरूपणे 'ब्राह्मणवसिष्ठन्यायः'[१४], षष्ठे अध्याये 'कैमुतिकन्यायः'[१५] इत्यादिरीत्या न्यायाः प्रयोजिताः।

तत्र पञ्चदशाऽध्याये उपान्तिके श्लोके 'हस्तिपदन्यायः' प्रयोजितः। इत्थं हि तत्र बद्धमुक्तसकलजीवेश्वरेभ्यस्तत्सर्वपरभूताद् अक्षरब्रह्मणश्चापि सर्वदा स्वाभाविकतया परमात्मनः श्रेष्ठत्वस्य तत्सर्वोपास्यत्वस्य च प्रस्थापनरूपोपक्रमः।

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥**[१६]

क्षरत्वमिह क्षरणस्वभावमायायोगवत्त्वम्। सर्वाणि भूतानीत्यस्य सकलजीवेश्वरसमूहाः क्षरः, कूटस्थो हि एकसंख्याकं ब्रह्माक्षरमिति ज्ञेयम्। एवं पुरुषपदं परामृश्य परमात्मनः परत्वं प्रारभ्यते।

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥**[१७]

**यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥**[१८]

ततश्च परमात्मनः सर्वोपरित्वज्ञानस्य फलनिरूपणम् एकेन एव लौकिकन्यायेन प्रदर्शयति।

**यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।**
**स सर्वविद्भजति मां सर्वभावेन भारत ॥**[१९]

भाष्ये दृश्यते यत् ' हस्तिपदन्यायेन सकलज्ञानरहस्यं तेन ज्ञातमितिभावः।'[२०] इति।

---

[१४] ३/४०, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१५] ६/४४, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१६] १५/१६, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१७] १५/१७, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१८] १५/१८, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१९] १५/१९, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

एवं सर्वेषु अपि त्रिषु प्रस्थानेषु स्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः बहुषु स्थानेषु दरिदृश्यते।

अथ किञ्चिद् विशेष उच्यते। 'पुरुषोत्तमो भगवान्, अक्षरब्रह्म, माया, ईश्वरः, जीवश्चेति पञ्च भेदा अनादयः'[२१] इति नित्यसत्यभेदवस्तुविवरणाऽवसरे परब्रह्म सहजानन्दः स्वयमेव व्याजहार। तेषु नित्यपञ्चतत्त्वेषु एकं तत्त्वं विद्यते अक्षरब्रह्म। दर्शनेऽस्मिन् तस्य अक्षरब्रह्मणः कार्यदृष्ट्या चत्वारि स्वरूपाणि स्वीक्रियन्ते।

**चिदाकाशस्तथा देशस्तद्देशस्थश्च सेवकः।**
**गुरुर्ब्रह्मस्वरूपश्च चतस्रो ब्रह्मणो विधा ।।**[२२]

तत्र एकं स्वरूपमस्ति अक्षरधामरूपम्। स्वरूपमिदं धामरूपेण परब्रह्मतत्सेवायामवस्थितस्य मूर्तिमतोऽक्षरब्रह्मणस्तथाऽनन्तकोट्यक्षरमुक्तानां दिव्यं निवासस्थानम्। एतदक्षरधामैकमेव, नित्यं सदा त्रिगुणातीतं च। अक्षरब्रह्मसाधर्म्यमाप्ता मुक्ता एव शक्नुवन्ति तस्मिन् प्रवेष्टुमिति। अस्य धाम्नः कृते प्रस्थानत्रय्यां ब्रह्मधाम, ब्रह्मपुरम्, ब्रह्मलोकः, ब्रह्मभुवनम् इत्यादिशब्दाः प्रयुज्यन्ते। एतच्छब्दानां स्वामिनारायणभाष्यावसरे भाष्यकारैरविस्मरन्नैव 'निषादस्थपति' इति एकस्य लौकिकन्यायस्य प्रयोगः कृतः। ब्रह्मसूत्रे चतुर्थाध्याये 'अप्रतीकालम्बनान् नयतीति बादरायण उभयथा च दोषात्'[२३] इतिसूत्रभाष्ये तथा च बृहदारण्यके 'तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति'[२४], 'एष ब्रह्मलोकः एष सम्राड्'[२५], 'ब्रह्मलोकेषु गार्गीति'[२६], कठोपनिषदि 'ब्रह्मलोके महियते'[२७] इत्यादिसर्वत्र निषादस्थपतिन्यायः स्मारितः। यथा निषादः एव स्थपतिः स्थपतिरेव निषादः तथैव ब्रह्म एव लोकः इति विग्रहः न तु ब्रह्मणो लोक इति।

---

[२०] १५/१९, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यांशः

[२१] वचनामृतम्, गढडाप्रथमप्रकरणम्- ७

[२२] स्वामिनारायणसिद्धान्तकारिका- ४१

[२३] ४/३/१४, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[२४] ६/२/१५, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[२५] ४/३/३२, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[२६] ३/६/१, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[२७] १/२/२, कठोपनिषत्स्वामिनारायणभाष्यम्

## उपसंहारः

वस्तुतस्तु ब्रह्मपरब्रह्माद्यतीन्द्रियानि तत्त्वानि लौकिकन्यायैर्न यथार्थतया ज्ञातुं शक्यानि तथापि तत् कथम् उपयोजनीयं तद्विवेकं स्वयं भाष्यकारो भाष्ये प्रस्तौति,

> **'अलौकिके हि लौकिकं दृष्टान्तादि नैव प्रसरेत् सर्वथा साम्याऽभावात्,**
>
> **तथाप्यनायासेनाऽवबोधनाय तद् देयमेव भवतीति।'**[२८]

एवं भाष्यकारेण स्वमतं प्रस्थापितम्।

इत्थं, प्रस्थानत्रयस्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः कुत्र कथं च कृतः, तेन सिद्धान्तावबोधने किदृक्सारल्यं जातमिति शोधपत्रे समाविष्टमिति।

अथाऽधुना समेत्य प्रस्थानत्रयीस्थानां शास्त्राणामनुसारेण सर्वेषां न्यायानां सूचिः शोधसारल्याय प्रस्तूयते-

### प्रस्थानत्रयस्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः

| क्रमः | न्यायः | सन्दर्भः |
|---|---|---|
| १ | जपाकुसुमन्यायः | ब्र. १/१/२ |
| २ | अभ्यासनयः | ब्र. १/२/२४, ब्र. ३/१/२४<br>गीता. २/२०, गीता. ४/२२ |
| ३ | सुप्तोत्थितन्यायः | ब्र. १/३/३० |
| ४ | काकाक्षिन्यायः | ब्र. १/३/३५ |
| ५ | देहलीदीपकन्यायः | ब्र. १/४/८, छा. ३/१४/१, छा. ३/१४/४ |
| ६ | समाकर्षणन्यायः | ब्र. १/४/१६ |
| ७ | तात्स्थ्यात् ताच्छब्द्यम् | ब्र. १/४/२३ |
| ८ | कैमुत्यनयः | ब्र. २/१/२९, गीता. ६/४४, गीता. ९/३३ |
| ९ | बीजाङ्कुरन्यायः | ब्र. २/१/३६ |
| १० | सप्तभङ्गीनयः | ब्र. २/२/३३ |

---

[२८] ७/२४/२, छान्दोग्योपनिषत्स्वामिनारायणभाष्यांशः

| | | |
|---|---|---|
| ११ | सर्वशाखानयः | ब्र. २/३/२, ब्र. ३/३/३५, ब्र. ४/४/७, बृह.३/७/२३, छा. ६/२/३, गीता. १८/६३ |
| १२ | ब्राह्मणपरिव्राजकनयः | ब्र. ३/१/११ |
| १३ | अग्र्यप्रायन्यायः | ब्र. ३/१/२२ |
| १४ | खट्वाप्रासादनयः | ब्र. ३/२/७, कठ. ४/१२, बृह. २/१/१७ |
| १५ | स्थूणानिखनननयः | ब्र. ३/३/५१, कठ. १/२१ |
| १६ | यथाक्रतुन्यायः | ब्र. ३/३/५२, ब्र. ४/३/६, ब्र. ४/३/१५, प्र. ५/३, बृह. १/५/१३, बृह. २/१/२, गीता. ९/२५ |
| १७ | आगन्तुकानामन्ते निवेशः | ब्र. ४/३/३ |
| १८ | उपसंहारन्यायः | ब्र. ४/३/३ |
| १९ | निषादस्थपतिन्यायः | ब्र. ४/३/१४, कठ. २/१७, बृह. ३/६/१, बृह. ४/३/३२, बृह. ६/२/१५ |
| २० | यद् यदुपरि तत् तद्भिन्नम् | के. १/४ |
| २१ | राजप्रासादवैभवेन राजसुखवैभवानुमानवद् | कठ. ५/१५ |
| २२ | तदावेशन्यायः | प्र. ५/२, मु. २/२/६ |
| २३ | हस्तिपदन्यायः | मु. १/१/१, छा. ५/२४/२, छा. ७/२४/२, छा. ७/२६/२, गीता. १५/१९ |
| २४ | यदुपकारकं तत्पूर्वम् | मु. १/१/४ |
| २५ | सिंहावलोकनन्यायः | मु. ३/१/८ |
| २६ | घटकं घटितं स्मारयेद् | छा. २/१/१ |
| २७ | रलयोरभेदः | छा. ३/१९/३ |
| २८ | शते पञ्चाशद् | छा. ४/१/४ |
| २९ | द्विर्बद्धं सुबद्धम् | छा. ४/१०/५, बृह. १/४/११ |
| ३० | घटीयन्त्रन्यायः | छा. ५/९/२ |
| ३१ | काकतालीयनयः | छा. ५/१०/६ |
| ३२ | साधकस्य सङ्कल्पं संपूर्यतेतिन्यायः | छा. ७/४/२ |
| ३३ | पञ्चीकरणन्यायः | बृह. १/२/२ |
| ३४ | कार्यकारणाऽनन्यत्वनयः | बृह. १/४/७ |
| ३५ | शास्त्रदृष्टिनयः | बृह. १/४/१०, गीता. ४/६ |

| | | |
|---|---|---|
| ३६ | कृतेषु प्रतिकर्तव्यमेष धर्म सनातनः | बृह. १/४/१६ |
| ३७ | तात्स्थ्यनयः | बृह. ५/३/१, बृह. ५/४/१ |
| ३८ | घटीयन्त्रन्यायः | बृह. ६/२/१४ |
| ३९ | ब्राह्मणवसिष्ठन्यायः | गीता. ३/४० |
| ४० | न ह्यैकस्मै दत्तं पुररन्यस्मै दातुं शक्यम् | गीता. ५/१० |

## सन्दर्भसूचिः

१. साधुः भद्रेशदासः, ब्रह्मसूत्रस्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, मई २००९ अमदावाद
२. साधुः भद्रेशदासः, ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, दिसम्बर २००९ अमदावाद
३. साधुः भद्रेशदासः, छान्दोग्योपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, अप्रैल २०१२ अमदावाद
४. साधुः भद्रेशदासः, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, अप्रैल २०१२ अमदावाद
५. साधुः भद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, जनवरी २०१२ अमदावाद
६. साधुः भद्रेशदासः, स्वामिनारायणसिद्धान्तसुधा, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, जून २०१७ अमदावाद
७. भगवान् स्वामिनारायणः, वचनामृतम्, उनविंशतितमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, २०१३ अमदावाद
८. वामन शिवराम आप्टे, संस्कृत - हिन्दी शब्दकोशः 1
९. न्यायावलिः